(घ) वास्तविकं भारतं नाम ग्राम एव ।

(ङ) तैः सह मिलित्वा वार्तालापं कृतवन्तः।

## 4. पाठाधारेण क्त्वान्तपदानि लिखत–

| | पदानि | धातुः | | प्रत्ययः | | क्त्वान्तरूपम् |
|---|---|---|---|---|---|---|
| **यथा-** | भवति | (भू) | + | क्त्वा | = | भूत्वा |
| (क) | मिलति | (मिल्) | + | क्त्वा | = | ............... |
| (ख) | पश्यति | (दृश्) | + | क्त्वा | = | ............... |
| (ग) | करोति | (कृ) | + | क्त्वा | = | ............... |
| (घ) | सहति | (सह्) | + | क्त्वा | = | ............... |
| (ङ) | स्मरति | (स्मृ) | + | क्त्वा | = | ............... |
| (च) | शृणोति | (श्रु) | + | क्त्वा | = | ............... |
| (छ) | गच्छति | (गम्) | + | क्त्वा | = | ............... |
| (ज) | पठति | (पठ्) | + | क्त्वा | = | ............... |

## 5. उदाहरणानुगुणं ल्यबन्तरूपाणि लिखत–

| | उपसर्गः | | धातुः | | प्रत्ययः | | ल्यबन्तरूपम् |
|---|---|---|---|---|---|---|---|
| **यथा-** | आ | + | नी | + | ल्यप् | = | आनीय |
| (क) | उत् | + | स्था | + | ल्यप् | = | ............. |
| (ख) | वि | + | क्री | + | ल्यप् | = | ............. |
| (ग) | स्वी | + | कृ | + | ल्यप् | = | ............... |
| (घ) | प्र | + | क्षाल् | + | ल्यप् | = | ............... |
| (ङ) | वि | + | चिन्त् | + | ल्यप् | = | ............... |
| (च) | वि | + | ज्ञा | + | ल्यप् | = | ............... |
| (छ) | वि | + | लिख् | + | ल्यप् | = | ............... |
| (ज) | उप | + | कृ | + | ल्यप् | = | ............... |
| (झ) | आ | + | गम् | + | ल्यप् | = | ............... |

**6. क्त्वा/ल्यप् योगेन वाक्यानि योजयन्तु–**

**यथा–** बालिका प्रश्नान् पठति। उत्तराणि लिखति।
बालिका प्रश्नान् पठित्वा उत्तराणि लिखति।

(क) बालकः फलं खादति। दुग्धं पिबति।

(ख) कविः संस्कृतं जानाति। काव्यं लिखति।

(ग) ऋचा गृहम् आगच्छति। गृहकार्यं करोति।

(घ) अर्चकः देवालयं गच्छति। पूजां करोति।

(ङ) माता शाकानि आनयति। पाकं करोति।

(च) जनकः प्रभाते उत्तिष्ठति। योगाभ्यासं करोति।

(छ) दीपेशः हस्तं प्रक्षालयति। भोजनं करोति।

(ज) समिधा मनसि विचिन्तयति। लेखं लिखति।

(झ) आराधना स्नानं करोति। पूजां करोति।

(ञ) विक्रेता वस्तूनि विक्रीणाति। धनम् अर्जयति।

**7. भिन्नप्रकृतिकं पदं चिनुत–**

(क) गत्वा, पठित्वा, भूत्वा, हसित्वा, पठितुम्।

(ख) दुग्धम्, दधि, नवनीतम्, तक्रम्, रोटिका।

(ग) भ्राता, भगिनी, माता, पिता, शिक्षकः।

(घ) काकः, कोकिलः, कपोतः, शुकः, मत्स्यः।

**योग्यताविस्तारः –**

- ग्रामीणजनानां दिनचर्यां ज्ञात्वा पञ्चवाक्यानि लिखत।

## दशमः पाठः

# महर्षिः पाणिनिः



**रमणः** — अइउण् .......... हल्

**हरिकृष्णः** — भ्रातः! किं पठसि? वेदघोष इव श्रूयते।

**रमणः** — माहेश्वरसूत्राणि पठामि।

**हरिकृष्णः** — एतानि सूत्राणि महेश्वरेण रचितानि किम्?

**रमणः** — शिवताण्डवसमये महेश्वरस्य ढक्कातः निस्सृतानि सूत्राणि एतानि। एवं महेश्वरात् आगतानि सन्ति, अतः माहेश्वरसूत्राणि इति कथ्यन्ते। पाणिनिना रचितानि सन्ति।

**हरिकृष्णः** — कः अयं पाणिनिः।

**रमणः** — पाणिनिः संस्कृतव्याकरणस्य नियमानां रचयिता।

**हरिकृष्णः** — व्याकरणस्य नियमाः के?

**रमणः** — प्रायः 4000 व्याकरणनियमाः सन्ति। तान्येव पाणिनीयसूत्राणि इति कथ्यन्ते। एतेषां सूत्राणां सङ्ग्रहग्रन्थः एव 'अष्टाध्यायी' इति।

**हरिकृष्णः** — किम् अत्र अष्ट अध्यायाः सन्ति?

**रमणः** — आम्! अत्र अष्ट अध्यायाः सन्ति। प्रत्येकस्मिन् अध्याये चत्वारः पादाः भवन्ति। आहत्य प्रायः 4000 सूत्राणि।

**हरिकृष्णः** — अग्रज! पाणिनेः जन्मविषये ज्ञातुम् इच्छामि।

**रमणः** — पाणिनेः जन्म वर्तमानपाकिस्तानस्य शलातुरग्रामे अभवत्। सः ग्रामः तक्षशिला नगरस्य समीपे अस्ति। तक्षशिला विश्वविख्यातम् अध्ययनकेन्द्रमासीत्।

**हरिकृष्णः** — पाणिनेः कालः कदा आसीत्?

**रमणः** — विद्वांसः वदन्ति पाणिनेः कालः प्रायः ईसा पूर्वं 520 तः 460 पर्यन्तम् आसीदिति।

**हरिकृष्णः** — पाणिनेः मातापित्रोः नाम किम्?

**रमणः** — मातुः नाम दाक्षी, पितुः नाम पाणी इति। सोऽयं दाक्षीपुत्रः पाणिनिः एव महावैयाकरणः त्रिषु मुनिषु अन्यतमः अस्ति।

**हरिकृष्णः** — त्रयः मुनयः के?

**रमणः** — प्रथमः सूत्रकारः पाणिनिः द्वितीयः वाक्यकारः वररुचिः तृतीयः तु भाष्यकारः पतञ्जलिः इति एते त्रयः मुनयः व्याकरणस्य प्रवर्तकाः।

**हरिकृष्णः** — भ्रातः! व्याकरणं नाम किम्?

**रमणः** — व्याकरणं नाम एकं विशिष्टं शास्त्रम् अस्ति। यत्र बहुविशिष्टं ज्ञानं वर्तते।

**हरिकृष्णः** — किं किं विशिष्टं ज्ञानम्?

**रमणः** — विशिष्टज्ञानम् एव विज्ञानम्। माहेश्वरसूत्रेषु स्वरविज्ञानम्, पाणिनीयसूत्रेषु गणितविज्ञानञ्च विद्यते।

**हरिकृष्णः** — भ्रातः! तर्हि पाणिनीयं व्याकरणं प्राचीनं विश्वप्रसिद्धं भारतीयं विज्ञानं खलु।

**रमणः** — सत्यं प्रोक्तम्। अतः तं विश्वप्रसिद्ध-व्याकरणसूत्रप्रणेतारं महर्षिं पाणिनिं भारतीयाः विदेशीयाश्च विज्ञानिनः सर्वदा स्मरन्ति नमन्ति च।

वयमपि शिरसा नमामः मनसा स्मरामः च —

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| नियमानाम् | = | नियमों के | व्याकरणस्य | = | व्याकरण के |
| अष्ट | = | आठ | चत्वारः | = | चार |
| आहत्य | = | मिलाकर | अग्रजः | = | बड़ा भाई |
| विश्वविख्यातम् | = | विश्वप्रसिद्ध | पर्यन्तम् | = | तक |
| वैयाकरणः | = | व्याकरण के ज्ञाता | | | |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) हरिकृष्णस्य भ्राता किं पठति?

(ख) अष्टाध्यायिग्रन्थे कति अध्यायाः सन्ति?

(ग) पाणिनेः पितुः नाम किम्?

(घ) माहेश्वरसूत्रेषु किं विज्ञानम् अस्ति?

(ङ) शलातुरग्रामः कुत्र अस्ति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) पाणिनिः कः?

(ख) त्रयः मुनयः के?

(ग) पाणिनेः जन्मस्थानं किम्?

(घ) पाणिनेः कालः कः?

**3. उचितं मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | सूत्रकारः | अष्टाध्याय्याम् |
| (ख) | भाष्यकारः | पाणिनिः |
| (ग) | वाक्यकारः | पतञ्जलिः |
| (घ) | दाक्षी | वररुचिः |
| (ङ) | ४००० सूत्राणि | पाणिनेः माता |

**4. कोष्ठकपदानि उपयुज्य रिक्तस्थानानि पूरयत–**

(चत्वारः, ढक्कातः, पाणिनिः, तक्षशिला, व्याकरणं)

(क) व्याकरणनियमानां रचयिता .................।

(ख) ................. विश्वविख्यातम् अध्ययनकेन्द्रमासीत्।

(ग) प्रत्येकस्मिन् अध्याये ................. पादाः सन्ति।

(घ) कृत्स्नं ............. प्रोक्तं तस्मै पाणिनये नमः।

(ङ) ताण्डवसमये महेश्वरस्य ............ एतानि सूत्राणि निस्सृतानि।

**5. युक्तं लिखत–**

(क) विशिष्टं ज्ञानम् – ...........................

(ख) पाणेः पुत्रः – ...........................

(ग) महेश्वरादागतानि सूत्राणि – ...........................

(घ) अष्ट अध्यायाः अत्र सन्तीति – ...........................

(ङ) पाणिनिः वररुचिः, पतञ्जलिः – ...........................

## योग्यताविस्तारः –

- **कण्ठस्थीकुरुत –**

  वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
  पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम्।।

  योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
  योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।

- अ इ उ ण् ॥1॥ ऋ लृ क् ॥2॥ ए ओ ङ् ॥3॥ ऐ औ च् ॥4॥ ह य व र ट् ॥5॥ ल ण् ॥6॥ ञ म ङ ण न म् ॥7॥ झ भ ञ् ॥8॥ घ ढ ध ष् ॥9॥ ज ब ग ड द श् ॥10॥ ख फ छ ठ थ च ट त व् ॥11॥ क प य् ॥12॥ श ष स र् ॥13॥ हल् ॥14॥ इति माहेश्वराणि सूत्राणि।

- भाष्यकारस्य पतञ्जलेः जीवन-जन्मस्थानादिविषये आचार्यसाहाय्येन जानन्तु।

*मुखं व्याकरणं स्मृतम्।*

## एकादशः पाठः

# अमरवाणी संस्कृतभाषा




"भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती"

भो छात्राः! श्रावणमासस्य द्वादशीतः भाद्रपदमासस्य तृतीयापर्यन्तं संस्कृतसप्ताहः भवति। अद्य श्रावणीपूर्णिमा अस्ति। किं भवन्तः जानन्ति? अद्य संस्कृतदिवसः अपि आयोज्यते। संस्कृतभाषा अतिप्राचीना अस्ति। दैवीयप्रेरणया उत्पन्ना अतः इयं भाषा देवभाषा इति कथ्यते। सम्पूर्णे अपि विश्वे आदिज्ञानस्य आधाराः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः इति चतुर्वेदाः तथा शिक्षा, कल्पः, ज्योतिषं, छन्दः, व्याकरणं, निरुक्तम् इति षड् वेदाङ्गानि अष्टोत्तरशतम् उपनिषदः षड् दर्शनानि अष्टादश पुराणानि चिकित्सानाट्यसाहित्य-शास्त्रादयः ग्रन्थाः च संस्कृतभाषायाम् एव लभ्यन्ते। पुरा संस्कृतभाषा जनभाषा आसीत्, अधुना अपि प्रासङ्गिकी अस्ति। संस्कृतस्य महत्त्वं विविधकारणैः अस्ति। यथा–

1. **आध्यात्मिकं महत्त्वम्–** आध्यात्मिकज्ञानेन भारतं जगद्गुरुः आसीत्। श्रीमद्भगवद्गीतादिभारतीयधर्म-दर्शनग्रन्थेषु गूढरहस्यानि दैवीयतत्त्वानि निहितानि। भौतिकजगति आध्यात्मिकशान्तिनिमित्तं वैदेशिकाः अपि भारतीयदर्शनस्य अध्ययनं कुर्वन्ति।

2. **सांस्कृतिकं महत्त्वम्–** "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।" तत्रापि "संस्कृतिः संस्कृताश्रिता" इति उच्यते। चत्वारः पुरुषार्थाः, चत्वारः आश्रमाः, षोडश संस्काराः, स्त्रीसमादरादयः, सदाचारविचाराः धर्मपुराणस्मृतिग्रन्थेषु संस्कृतभाषायाम् एव प्रतिपादिताः।

3. **साहित्यिकं महत्त्वम्–** संस्कृतभाषायाम् आदिकविवाल्मीकिम् आरभ्य विष्णुशर्माकालिदास-भारविमाघदण्डिभर्तृहरिजयदेवादीनां वैविध्यपूर्णकवीनां विश्वप्रसिद्धा समृद्धपरम्परा अस्ति। एतेषां कृतिषु गद्यपद्यनाट्यकाव्यगीतिनीतिस्तोत्रकथासाहित्यस्य भण्डारः दृश्यते।

4. **वैज्ञानिकं महत्त्वम्–** विज्ञानस्य विभिन्नक्षेत्रेषु भारतीयवैज्ञानिकैः पाणिनि-पतञ्जलि-कणाद-आर्यभट्ट-वराहमिहिर-भास्कराचार्यादिभिः संस्कृते लिखिताः ग्रन्थाः अद्यापि विश्वस्य मार्गदर्शनं कुर्वन्ति। भाषाविज्ञानदृष्ट्या अपि सुदृढसुबद्धव्याकरणकारणात् सङ्गणकाय अस्याः भाषायाः उपयोगिता उद्घोषिता। समस्तभारतीयभाषाणां जनन्याः संस्कृतभाषायाः प्रभावः अन्यवैदेशिकभाषासु अपि दृश्यते। समृद्धशब्दभण्डारकारणात् आधुनिकप्राविधिकक्षेत्रे पारिभाषिकशब्दानुवादसमये संस्कृतस्य एव साहाय्यं स्वीक्रियते।

न केवलम् एतानि कारणानि अपि तु संस्कृतं सम्पूर्णं राष्ट्रम् एकसूत्रेण बध्नाति।

अस्याः भाषायाः ऐतिहासिक-सामाजिक-राष्ट्रिय-अन्ताराष्ट्रियक्षेत्रेषु अपि महत्त्वम् अस्ति। एतस्याः महत्त्वं ज्ञात्वा इदानीं सर्वकारः अपि पुनः जनभाषां कर्तुं 1999-2000 वर्षं 'संस्कृतवर्षम्' इति उद्घोष्य संस्कृतस्य प्रचारप्रसारे संलग्नः अस्ति। भारते इदानीं पञ्चदश संस्कृतविश्वविद्यालयाः सन्ति। सर्वे प्रायः चिन्तयन्ति यत् संस्कृतं कठिनम् इति; किन्तु वस्तुतः एषा सरला सरसा सुबोधजनभाषा अस्ति। अतः कर्णाटके 'मत्तूर ग्रामे' मध्यप्रदेशे 'झीरिग्रामे' च जनाः संस्कृतेन वदन्ति। इदानीम् अस्माभिः अपि संस्कृतं पठित्वा अस्याः भाषायाः प्रसाराय प्रयत्नः करणीयः।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| गीर्वाणभारती | = | संस्कृत भाषा (देवभाषा) | दैवीयप्रेरणया | = | देवों की प्रेरणा से |
| प्रासङ्गिकी | = | समयानुकूल | पुरा | = | प्राचीनकाल में |
| अधुना | = | वर्तमान में/अभी | प्राविधिकक्षेत्रम् | = | तकनीकी क्षेत्र |
| स्वीक्रियते | = | ली जाती है। | सर्वकारः | = | सरकार |
| उद्घोष्य | = | उद्घोषणा करके | करणीयः | = | करना चाहिए |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**

(क) का भाषा 'देवभाषा' इति कथ्यते?

(ख) कदा संस्कृतदिवसः आयोज्यते?

(ग) आदिज्ञानस्य आधाराः के?

(घ) किं वर्षं संस्कृतवर्षम्?

(ङ) भारतस्य द्वे प्रतिष्ठे के?

(च) का भाषा सम्पूर्णं राष्ट्रम् एकसूत्रेण बध्नाति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) संस्कृतभाषायाः पञ्चकवीनां नामानि लिखत?

(ख) गूढरहस्यानि दैवीयतत्त्वानि कुत्र निहितानि?

(ग) कस्मात् कारणात् सङ्गणकाय संस्कृतम् उपयुक्तम्?

(घ) कयोः ग्रामयोः जनाः संस्कृतेन वदन्ति?

(ङ) धर्मपुराणस्मृतिग्रन्थेषु किं किं प्रतिपादितम्?

(च) चत्वारः वेदाः के?

**3. रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरुत–**

(क) श्रावणीपूर्णिमायां <u>संस्कृतदिवसः</u> आयोज्यते।

(ख) पुरा संस्कृतभाषा <u>जनभाषा</u> आसीत्।

(ग) <u>आध्यात्मिकज्ञानेन</u> भारतं जगद्गुरुः आसीत्।

(घ) <u>समस्तभारतीयभाषाणां</u> जननी संस्कृतम्।

(ङ) भारते <u>पञ्चदश</u> संस्कृतविश्वविद्यालयाः सन्ति।

**4. उचितं मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | वेदाः | झीरिग्रामः |
| (ख) | वेदाङ्गानि | 1999-2000 |
| (ग) | दर्शनानि | 4 (चत्वारः) |
| (घ) | उपनिषदः | 6 (षट्) |
| (ङ) | पुराणानि | 6 (षट्) |
| (च) | संस्कृतवर्षम् | 18 (अष्टादश) |
| (छ) | आदिकविः | 108 (अष्टोत्तरशतम्) |
| (ज) | संस्कृतग्रामः | वाल्मीकिः |

**5. कोष्ठकात् उचितपदं चित्वा रेखाङ्कितपदैः प्रश्ननिर्माणं कुरुत–**

(कस्याः, केषाम्, कीदृशी, कस्य)

(क) <u>आर्याणां</u> भाषा संस्कृतभाषा आसीत्।

(ख) <u>भोजस्य</u> राज्ये सर्वे जनाः संस्कृतभाषायाम् एव वदन्ति स्म।

(ग) <u>आङ्गलभाषायाः</u> कतिपयेषु शब्देषु संस्कृतभाषायाः प्रभावः दृश्यते।

(घ) बाणभट्टस्य कादम्बरी अपि संस्कृतभाषायाः <u>उत्कृष्टा</u> कृतिः अस्ति।

## 6. उचितपदेन रिक्तस्थानं पूरयत–

(संस्कृतभाषायाः, संस्कृतभाषायाः, संस्कृतभाषाम्, संस्कृतभाषा)।

क) जनाः ................. वदन्ति।

ख) .................... देववाणी कथ्यते।

ग) ................... विकासः आवश्यकः अस्ति।

घ) भारतीयभाषाणाम् उद्गमः ................ एव अभवत्।

## 7. उचितम् अव्ययपदं चित्वा कथां पूरयत–

(सत्वरं, पुरा, इति, अन्तः, मन्दं-मन्दं, बहिः, एकदा, शीघ्रं, उच्चैः, उपरि, शनैः शनैः, परितः, पुरतः)

............ काले एकस्मिन् वने बहवः पशुपक्षिणः निवसन्ति स्म। ............ वनस्य ............ नूतनवर्षस्य सभा आसीत्। शशकः कच्छपं ............ आगच्छतु ............ उक्त्वा ............ सभां गतवान्। स्थूलः गजः ............ ............ आगतः। मूषकः बिलात् ............ आगत्य सभां गतः। सर्वे पशुपक्षिणः आगत्य मञ्चस्य ............ उपविष्टाः। सभास्थले ............ वानराः आसन्। सिंहः ............ गर्जनं कृत्वा मञ्चस्य ............ उपविष्टः। सिंहः भाषणं दत्वा शुभकामनाः दत्तवान्। सर्वे मिष्टान्नं खादितवन्तः कच्छपः ............ ............ विलम्बेन आगतवान्। तं दृष्ट्वा सर्वे हसितवन्तः।

## योग्यताविस्तारः –

- **स्मरतु–**

| कविः/लेखकः | कृतिः | कविः/लेखकः | कृतिः |
|---|---|---|---|
| वाल्मीकिः | रामायणम् | वेदव्यासः | महाभारतम् |
| कालिदासः | अभिज्ञानशाकुन्तलम् | बाणभट्टः | कादम्बरी |
| चाणक्यः/कौटिल्यः | अर्थशास्त्रम् | नारायणपण्डितः | हितोपदेशः |
| विष्णुशर्मा | पञ्चतन्त्रम् | पाणिनिः | अष्टाध्यायी |
| पतञ्जलिः | महाभाष्यम् | भरतमुनिः | नाट्यशास्त्रम् |
| भासः | स्वप्नवासवदत्तम् | भारविः | किरातार्जुनीयम् |
| भर्तृहरिः | नीतिशतकम् | माघः | शिशुपालवधम् |
| जयदेवः | गीतगोविन्दम् | श्रीहर्षः | नैषधीयचरितम् |
| शङ्कराचार्यः | सौन्दर्यलहरी,<br>कनकधारास्तोत्रम् | | |

● प्रमुखध्येयवाक्यानि अवधानेन पठत स्मरणं च कुरुत–

| ध्येयवाक्यम् | विभागः |
|---|---|
| सत्यमेव जयते | भारतसर्वकारः |
| सत्यं शिवं सुन्दरम् | दूरदर्शनम् |
| बहुजनहिताय | आकाशवाणी |
| यतोधर्मस्ततोजयः | सर्वोच्चन्यायालयः |
| नभः स्पृशं दीप्तम् | वायुसेना |
| योगक्षेमं वहाम्यहम् | जीवनबीमानिगमः |
| अहर्निशं सेवामहे | डाकतारविभागः |
| धर्मचक्रप्रवर्तनाय | लोकसभा |
| श्रम एव जयते | श्रममन्त्रालयः |

*भारते भातु भारती।*

द्वादशः पाठः

# प्रहेलिकाः



अपदं दूरगामी च, साक्षरं न च पण्डितः।
अमुखं स्फुटवक्ता च, मां जानाति सः पण्डितः॥1॥

अहं पादाभ्यां विना दूरं गच्छामि। अक्षरयुक्तः किन्तु पण्डितः नास्मि। अहं मुखेन विना स्पष्टं वदामि। यः मां जानाति सः पण्डितः।



न तस्यादिः न तस्यान्तः, मध्ये यस्तस्य तिष्ठति।
ममाप्यस्ति तवाप्यस्ति, यदि जानासि तद् वद॥2॥

'न' तस्य आदिः। 'न' तस्य अन्तः। मध्ये 'य' अस्ति। मम अपि अस्ति। तव अपि अस्ति। यदि जानासि तद् वद।



सुप्तोऽपि नेत्रे न निमीलयामि, जलस्य मध्ये निवसामि नित्यम्।
स्वजातिजीवाः मम भोजनानि, वदन्तु मान्याः ! मम नामधेयम्॥3॥

अहं सुप्ते अपि नेत्रे न निमीलयामि। जलस्य मध्ये एव निवसामि। स्वजातिजीवाः मम भोजनानि सन्ति। मान्याः! मम नाम वदन्तु।



तिष्ठामि पादेन बको न पङ्गुः, दाता फलानां न कृतिर्न यत्नः।
मौनेन जीवामि मुनिर्न मूकः, सेव्योऽस्मि कोऽहं नृपतिर्न देवः॥4॥

अहं पादेन तिष्ठामि किन्तु न बकः, न पङ्गुः। अहं फलानां दाता; किन्तु न कृतिः, न यत्नः। मौनेन जीवामि; किन्तु न मुनिः, न मूकः। सेव्यः अस्मि अहं; किन्तु न नृपतिः, न देवः। अहं कः?



वृक्षाग्रवासी न च पक्षिराजः, त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी, जलं च विभ्रन्न घटो न मेघः॥5॥

अहं वृक्षाग्रवासी, किन्तु न पक्षिराजः। अहं त्रिनेत्रधारी; किन्तु न शूलपाणिः। अहं त्वग्वस्त्रधारी किन्तु न सिद्धयोगी। जलं विभ्रन् किन्तु न घटः, न मेघः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अपदम् (वि.) | = बिना पैर वाले | दूरयानम् (न.पु.) | = दूर तक जाने वाला वाहन |
| साक्षरम् (वि.) | = अक्षरयुक्त | अमुखम् (वि.) | = बिना मुखवाले |
| स्फुटवक्ता | = स्पष्ट बोलने वाला | तस्यादिः | = उसका प्रारम्भ |
| तस्यान्तः | = उसका अन्त | ममाप्यस्ति | = मेरा भी है |
| निमीलयामि | = मैं मूँद लेता हूँ | वदन्तु | = कहें |
| नामधेयम् | = नाम | कृतिः | = रचना |
| सेव्योऽस्मि | = सेवा योग्य हूँ | वृक्षाग्रवासी | = वृक्ष के ऊपर रहने वाला |
| पक्षिराजः | = गरुड | बिभ्रन् | = धारण करता हुआ |
| शूलपाणिः (पु.) | = हाथ में शूल रखने वाले शंकर | | |
| त्वक् | = वृक्ष की छाल | | |
| त्वग्वस्त्रधारी | = पेड़ की छाल के वस्त्र को धारण करने वाले | | |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) सुप्तोऽपि नेत्रे कः न निमीलयति?

(ख) फलानां दाता कः अस्ति?

(ग) पक्षिराजः कः अस्ति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) मूकः कथं जीवति?

(ख) एकेन पादेन कः तिष्ठति?

(ग) नारिकेलफले कति नेत्राणि भवन्ति?

**3. रिक्तस्थानानि पूरयत–**

(पण्डितः, मम, मूकः, शूलपाणिः, तस्यादिः)

(क) न ............ न तस्यान्तः।

(ख) साक्षरं न च ...............।

(ग) त्रिनेत्रधारी न च ...........।

(घ) स्वजातिजीवाः ............... भोजनानि।

(ङ) मौनेन जीवामि मुनिर्न .............।

4. उचितं मेलनं कुरुत–

| | (अ) | (ब) |
|---|---|---|
| (क) | वृक्षाग्रवासी न च पक्षिराजः | दाता फलानां न कृतिर्न यत्नः। |
| (ख) | अपदं दूरयानञ्च | जलस्य मध्ये निवसामि नित्यम्। |
| (ग) | तिष्ठामि पादेन बको न पङ्गुः | त्रिनेत्रधारी न च शूलपाणिः। |
| (घ) | सुप्तोऽपि नेत्रे न निमीलयामि | मध्ये यस्तस्य तिष्ठति। |
| (ङ) | न तस्यादिः न तस्यान्तः | साक्षरं न च पण्डितः। |

5. सन्धिविच्छेदं कुरुत–

(क) तस्यादिः ........... + ............

(ख) तस्यान्तः ........... + ............

(ग) वृक्षाग्रवासी ........... + ............

(घ) ममाप्यस्ति ........... + ............

(ङ) तवाप्यस्ति ........... + ............

6. समानार्थकपदानां मेलनं कुरुत–

| | (अ) | (ब) |
|---|---|---|
| (क) | पादाभ्यां | भूपतिः |
| (ख) | नेत्रे | जलदः |
| (ग) | नृपतिः | नयने |
| (घ) | मेघः | चरणाभ्याम् |

7. विपरीतार्थकपदानां मेलनं कुरुत–

| | (अ) | (ब) |
|---|---|---|
| (क) | आदिः | उन्मीलनं |
| (ख) | तिष्ठामि | वाचालः |
| (ग) | निमीलनं | गच्छामि |
| (घ) | मूकः | अन्तः |

8. **उदाहरणानुगुणम् अन्वयपूर्तिं कुरुत–**

न तस्यादिः न तस्यान्तः, मध्ये यस्तस्य तिष्ठति।
ममाप्यस्ति तवाप्यस्ति, यदि जानासि तद् वद।।

**अन्वयः-** न तस्य आदिः, न तस्य अन्तः, तस्य मध्ये यः तिष्ठति, मम अपि अस्ति, तव अपि अस्ति, यदि जानासि तद् वद।

(क) सुप्तः ......... नेत्रे न निमीलयामि, जलस्य ......... नित्यं ........., मम ......... स्वजातिजीवाः, मान्या! ......... नामधेयं .........।

(ख) ......... तिष्ठामि बकः न ........., दाता ......... न कृतिः ......... यत्नः, मौनेन ........... मुनिः ......... मूकः, सेव्यः ......... कः नृपतिः ........... देवः।

**योग्यताविस्तारः –**

- प्रहेलिकाः कण्ठस्थीकुरुत।
- नूतनानां प्रहेलिकानां सङ्कलनं कुरुत।

*प्रहेलिका बुद्धिमतां विनोदः।*

# त्रयोदशः पाठः

# सौरमण्डलम्




वयं प्रतिदिनं सूर्यं चन्द्रं नक्षत्राणि च पश्यामः, चकिताः आह्लादिताश्च भवामः। ब्रह्माण्डस्य आकाशगङ्गायाम् आकाशपिण्डानां समूहाः वर्तन्ते। तेषु आकाशपिण्डेषु तारागणाः ग्रहाः उपग्रहाः च दृश्यन्ते।

ये स्वप्रकाशयुक्ताः भवन्ति ते ताराः इति कथ्यन्ते। तेषु सूर्यः प्रमुखः। सः स्वप्रकाशेन ग्रहान् उपग्रहान् च प्रकाशयति।

स्वप्रकाशरहिताः पिण्डाः ग्रहाः इति कथ्यन्ते। सर्वे ग्रहाः सूर्यं परिक्रमन्ति। पृथिवी अपि सूर्यात् सुदूरे स्थित्वा स्वयं स्वधुरिं 23.56 होरासु भ्रमन्ती 365.25 दिवसेषु सूर्यं परिक्रमति। पृथिव्या सह अन्ये ग्रहाः अपि सूर्यप्रकाशेनैव प्रकाशिताः भवन्ति। सूर्यः केन्द्रस्थाने तिष्ठति। सर्यं पूरितः क्रमेण बुधः, शुक्रः, पृथिवी, मङ्गलः, बृहस्पति (गुरुः), शनिः, यूरेनस (अरुणः), नेपच्यून (वरुणः), प्लूटो* (यमः) इति ग्रहाः परिभ्रमन्ति।

उपग्रहाः ग्रहं परितः भ्रमन्ति। प्रत्येकस्य ग्रहस्य उपग्रहाः सन्ति। चन्द्रः पृथिव्याः उपग्रहः। चन्द्रस्य पृथिवीं परितःभ्रमणकालः 27.32 दिवसाः। प्रतिदिनं चन्द्रस्य आकारभेदः दृश्यते। पौर्णिमायाः रात्रौ पूर्णचन्द्रस्य दर्शनं भवति। अमावस्यायां रात्रौ तु चन्द्रस्य दर्शनं न भवति।

सूर्यस्य मण्डले एव एतेषां सर्वेषां ग्रहाणाम् उपग्रहाणां च स्थितिः अस्ति। अतः एतदेव सौरमण्डलम् इति उच्यते। एतान् अतिरिच्य आकाशगङ्गायाम् ईदृशानां तारागणानाम् अनेके समूहाः वर्तन्ते। ब्रह्माण्डस्य विशालतायाः कल्पना दुष्करा एव अस्ति।

* 24 अगस्त 2006 तमे वर्षे 'अन्ताराष्ट्रियखगोलविज्ञानयूनियन' द्वारा अनुमोदितप्रस्तावानुसारम् इदानीं प्लूटो* (यमः) ग्रहस्य परिभाषायां नास्ति अतः तस्य ग्रहरूपेण गणना न भवति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| आह्लादिताः | = प्रसन्न (बहुवचनम्) | अतिरिच्य | = छोड़कर |
| दृश्यन्ते | = दिखाई देते हैं | कथ्यन्ते | = कहे जाते हैं |
| होरासु | = घण्टों में | परितः | = चारों ओर |
| दुष्करा | = कठिन | ईदृशानां | = इस प्रकार से |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) स्वप्रकाशरहिताः के?

(ख) सर्वे ग्रहाः कं परिभ्रमन्ति?

(ग) पृथिव्याः उपग्रहः कः?

(घ) कदा चन्द्रस्य दर्शनं न भवति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) आकाशपिण्डेषु के के दृश्यन्ते?

(ख) पृथिव्याः सूर्यपरिक्रमणकालः कः?

(ग) सूर्यं परितः के ग्रहाः परिभ्रमन्ति?

(घ) चन्द्रस्य पृथिवीं परितः भ्रमणकालः कः?

(ङ) सौरमण्डलमिति किमर्थम् उच्यते?

**3. उचितं मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | स्वप्रकाशयुक्ताः | 27.32 दिवसाः |
| (ख) | स्वप्रकाशरहिताः | चन्द्रस्य अदर्शनम् |
| (ग) | पृथिव्याः भ्रमणकालः | सूर्यं परिक्रमन्ति |
| (घ) | चन्द्रस्य परिभ्रमणकालः | ग्रहाः |
| (ङ) | पौर्णिमायां | 23.56 होराः |
| (च) | अमावस्यायां | ग्रहं परिक्रमन्ति |
| (छ) | उपग्रहः | ताराः |
| (ज) | नवग्रहाः | पूर्णचन्द्रस्य दर्शनम् |

**4. रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरुत–**

(क) <u>पौर्णिमायां</u> रात्रौ चन्द्रस्य दर्शनं भवति।

(ख) वयं प्रतिदिनं <u>सूर्यं चन्द्रं नक्षत्राणि</u> च पश्यामः।

5. **आत्मनेपदधातुरूपाणि लिखत–**

**यथा–**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लभते | लभेते | लभन्ते |
| मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुषः | लभे | लभावहे | लभामहे |

(क) याच्  (ख) सेव्  (ग) शुभ् (शोभ्)

6. **रिक्तस्थानानि पूरयत–**

(क) सूर्यः ................ प्रकाशयति।

(ख) सर्वे ग्रहाः ................ परिक्रमन्ति।

(ग) ................ ग्रहं परितः भ्रमन्ति।

(घ) ................ रात्रौ पूर्णचन्द्रस्य दर्शनं भवति।

(ङ) प्रतिदिनं चन्द्रस्य ................ दृश्यते।

7. **भिन्नप्रकृतिकानां क्रियारूपाणां वर्गीकरणं कुरुत–**

मोदते, जानाति, पठथ, याचे, गच्छामि, सेवामहे, करोषि, शोभेते।

**योग्यताविस्तारः–**

- नक्षत्राणां, ग्रहाणां च विषये अध्ययनं कुरुत।
- आत्मनेपदिधातुरूपाणां प्रयोगम् अवलोकयत।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रम् + अते = रमते | रम् + एते = रमेते | रम् + अन्ते = रमन्ते |
| मध्यमपुरुषः | रम् + असे = रमसे | रम् + एथे = रमेथे | रम् + अध्वे = रमध्वे |
| उत्तमपुरुषः | रम् + ए = रमे | रम् + आवहे = रमावहे | रम् + आमहे = रमामहे |

*सूर्य आत्मा जगतस्तस्थुषश्च।*

# चतुर्दशः पाठः

# लोकमान्यतिलकः



लोकमान्यबालगङ्गाधरतिलकः महान् देशभक्तः आसीत्। महाराष्ट्रप्रान्ते रत्नगिरिमण्डले जुलाईमासस्य त्रयोविंशतितमे दिनाङ्के, 1856 ख्रिस्ताब्दे तस्य जन्म अभवत्। तस्य जनकः गङ्गाधरः कुशलशिक्षकः लेखकः च आसीत्।

तिलकः गणितस्य, संस्कृतभाषायाः, विधिशास्त्रस्य च प्रकाण्डपण्डितः आसीत्। सः छात्रजीवने एव निश्चयम् अकरोत् यत् ''अहं शासकीयसेवां न करिष्यामि।'' आजीवनं भारतस्य स्वतन्त्रतायाः कृते सङ्घर्षं करिष्यामि च इति।

सः अघोषयत्, 'स्वराजः मम जन्मसिद्धः अधिकारः अस्ति इति।'

तिलकः राष्ट्रसेवायाः कृते संलग्नः अभवत्। जनजागरणस्य कृते सः शिवराजोत्सवस्य गणेशोत्सवस्य च प्रारम्भम् अकरोत्। सः केसरी-मराठेति समाचारपत्रयोः सम्पादनं च अकरोत्। तिलकमहोदयस्य प्रभावेण देशे स्वतन्त्रतायै नवचेतना सञ्जाता। सः लोकमान्यः इति उपाधिना विभूषितः। तस्य प्रभावम् असहमानाः आङ्ग्लाः तस्योपरि राजद्रोहस्य मिथ्याभियोगं न्यायालये प्रस्तुतवन्तः। न्यायाधीशेन सः षट्वर्षभोग्येन कारावासेन दण्डितः। सः निर्भयम् अवदत्, ''अस्मात् न्यायालयात् परमेश्वरस्य न्यायालयः उच्चतरः अस्ति। तस्मिन् अहं निर्दोषः अस्मि। कारागारे सः 'गीतारहस्य' नामकं ग्रन्थम् अरचयत्।

सः महान् कर्मयोगी आसीत्। सः अकथयत्, ''उद्यमहीनस्य सहायतां परमात्मा अपि न करोति। कर्मशीलस्य सहायतां प्रभुः करोति।''

अगस्तमासस्य प्रथमदिनाङ्के 1920 तमे वर्षे सः दिवंगतः। सत्यम्! बालगङ्गाधरतिलकमहोदयः अस्माकं देशस्य गौरवम्।

केनापि सुष्ठु उक्तम्, ''तिलकः'' भारतभालस्य 'तिलकम्' इव भाति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| जनकः | = पिता | कृते | = के लिए |
| असहमानाः | = सहन न करने वाले | आङ्ग्लाः | = अङ्ग्रेज |
| तस्योपरि | = उनके ऊपर | मिथ्या | = झूठा |

| | | | |
|---|---|---|---|
| प्रस्तुतवन्तः | = प्रस्तुत किया | निर्दोषः | = दोषरहित |
| अरचयत् | = रचना की | दिवङ्गतः | = मृत्यु हो गई |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) लोकमान्यतिलकः कः आसीत्?

(ख) तिलकः केन उपाधिना विभूषितः?

(ग) तिलकस्य प्रभावेण देशे का सञ्जाता?

(घ) तिलकः कस्मिन् मासे दिवङ्गतः?

(ङ) कस्य सहायतां प्रभुः करोति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) तिलकस्य जन्मस्थानं कुत्र अस्ति?

(ख) तिलकस्य जनकः कः आसीत्?

(ग) तिलकः छात्रजीवने कं निश्चयम् अकरोत्?

(घ) तिलकेन कः ग्रन्थः रचितः?

(ङ) तिलकः किम् अघोषयत्?

**3. रेखाङ्कितपदम् आश्रित्य प्रश्ननिर्माणं कुरुत–**

(क) <u>लोकमान्यतिलकः</u> महान् देशभक्तः आसीत्।

(ख) तिलकः <u>राष्ट्रसेवायाः</u> कृते संलग्नः अभवत्।

(ग) <u>जनजागरणस्य</u> कृते सः शिवराजोत्सवस्य गणेशोत्सवस्य च प्रारम्भम् अकरोत्।

(घ) <u>कर्मशीलस्य</u> सहायतां प्रभुः करोति।

(ङ) <u>तिलकः</u> भारतभालस्य 'तिलकम्' इव भाति।

**4. अधोलिखितपदानां पर्यायवाचिपदानि लिखत–**

(क) जनकः (ख) निर्भयः (ग) मिथ्या

(घ) परमेश्वरः (ङ) भालः

**5. अधोलिखितपदानां विलोमपदानि लिखत–**

(क) निर्दोषः (ख) स्वतन्त्रता (ग) अस्ति

(घ) जन्म (ङ) उद्यमहीनः

## 6. उचितशब्देन रिक्तस्थानानि पूरयत–

(लोकमान्यः, भारतभालस्य, अस्माकं, संलग्नः, अगस्तमासस्य)

(क) तिलकः राष्ट्रसेवायाः कृते ............... अभवत्।

(ख) तिलकमहोदयः ............... देशस्य गौरवम्।

(ग) ............... प्रथमदिनाङ्के 1920 तमे वर्षे सः दिवङ्गतः।

(घ) तिलकः ............... 'तिलकम्' इव भाति।

(ङ) सः ............... इति उपाधिना विभूषितः।

## 7. सन्धिं कुरुत–

| | | | |
|---|---|---|---|
| क) | शिवराज | + | उत्सवः |
| ख) | गणेश | + | उत्सवः |
| ग) | तस्य | + | उपरि |
| घ) | परम | + | आत्मा |
| ङ) | परम | + | ईश्वरः |

## 8. चतुर्थीविभक्तेः स्थाने षष्ठीविभक्त्या सह 'कृते' इति शब्दं योजयित्वा लिखितुं शक्नुमः।

उदाहरणानुसारं लिखत—

यथा देशाय — देशस्य कृते

(क) त्यागाय

(ख) ग्रामाय

(ग) नगराय

(घ) विद्यालयाय

(ङ) समाजाय

## योग्यताविस्तारः –

- पाठादतिरिक्तानि बालगङ्गाधरतिलकस्य विशिष्टाणि कार्याणि प्रसिद्धानि लिखत।
- पाठे आगतानि पुंल्लिङ्ग–स्त्रीलिङ्ग–नपुंसकलिङ्ग–पदानि चित्वा सूचीनिर्माणं कुरुत।

*विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता।*